# चतुर्थं प्रकरणम्

## -पितृ दिनेशयोः प्राणी देहः[1]

महर्षिणा अत्र उक्तं उत्तम स्वास्थ्यं दीर्घायुः केवलं कति पयैरेव भाग्य-शालिभिर्मन वैसाप्यते सोत्तमाआयुनामि योगो स्य लक्षणम् शताद्धर्ध्वमायुः प्राप्तिरिति कथितम् । जैमिनीय सूत्रे द्वितीय अध्यायस्य प्रथम पादे संदीपेण महत्वपूर्णं मुक्तं ~~वर्तते~~ वर्तते ।


*आयुः पितृदिनेशाभ्याम्, प्रथमयोरूत्तर योर्वा दीर्घम् प्रथम द्वितीय योरन्त्यपोर्वा मध्यमम्, मध्ययोराद्यन्तयोर्वा हीनम्`[2] अने नैक प्रकारेण लग्न चन्द्राभ्या-मपि विज्ञातव्यम् । तथा च होरालग्न जन्म लग्नाभ्यामपि । लग्नेशष्टमैश योर्मध्ये यो बलवान् स च यदि केन्द्रस्थस्तदा दीर्घायुर्योगः । स पणफरस्थश्चेत्तर्हि मध्यमा-युर्योगः ।

यदि जन्मराशिस्वामि लग्नेश युक्तः स्यात्, देह पुष्टिः भवति । लग्ने गुरु युते वा गुरु दृष्टे देह पुष्टिः स्यात् । मिथुनाशे देह पुष्टिः स्यात् । तथा च बुधात्सप्तमे भौमे जातकः दीर्घ देह युतः स्यात् ।

| | | | | | |
|---|---|---|---|---|---|
| नासिका | शिरः | मुखम् | कण्ठ | | |
| कर्णयो | जैमिनि तालिका | | | बाहुः | |
| नेत्र | | | | उदर | |
| पादौ | गुदः | चार तालिका | | हृदयः कण्ठ भाग | |


| | | | |
|---|---|---|---|
| पादौ | शिरः | मुखं | बाहु |
| પાદ અંગુલિકા | पाराशर तालिका | | हृदयम् |
| પાદ મધ્ય: | | | उदर |
| ઉરુ: | ગુહ્ય। | નાભિ: (ઉદર:) | બસ્તિ |

अस्य शरीरस्य सौमनस्यं सूर्यं मेलः सेव अधिष्ठाता, सप्तमेशो चन्द्रः अस्य हृदयम् । तत्र लाभ चन्द्र्यौः प्राणि हृदयम्, लेय चन्द्र्यौः प्राणि शिरः, भाग्य चन्द्र्यौः प्राणि मुखम्, काम चन्द्र्यौः कान्तः, दार चन्द्र्यौ प्राणी बाहुः, मातृ - चन्द्र्यौः प्राणी उदरम्, ततश्चन्द्र्यौः प्राणी जघनं, लाभ चन्द्र्यौः प्राणी पृष्टः, दिन चन्द्र्यौः प्राणी गुदः , धन चन्द्र्यौः प्राणी पादौ, रिः फ चन्द्र्यौः प्राणी नेत्रे, शूल चन्द्र्यौः कर्णयौ प्राणी कर्णौ, रौप्य चन्द्र्यौः प्राणी नासिके । एते द्वादश भावाः शरीरस्य द्वादश विभागाः भिन्न- भिन्न नामेषु समुट्टंकिताः-




काल पुरुषस्य अन्त: स्थान रूपा यथा हि आत्मा आदि स्थाने ग्रहास्तथास्य शरीराच्य बहिरंगानां स्थाने मेषाद्यो द्वादश राशय: प्रोक्ता: । अश्नुते व्याप्नोति तिजं तन्नाम राशि: तेषां यथाक्रमं स्वरूपं प्रसंगानुसारेण निरूप्यते - मेष: काल पुरुषस्य बाहु: क्रूर:, चर:, रक्तवर्ण:, वृहद्गात्र:, चतुष्पाद, रात्रि विक्रमी, पूर्वदिग्वासी, क्षत्रियवर्ण:, पर्वतचर:, रजोगुणी, पृष्ठोदय:,अग्नितत्व:, भौमश्चास्याधिपति:, विषमसंज्ञक:, पुल्लिंग:, पित्त, प्रकृतिकश्च प्रोक्त: ।

वृष: कालपुरुषस्याननं स्थिर:, सौम्य: सम: वात प्रकृतिक:,



प्रथम भाव
द्वितीय भाव
तृतीय भाव
चतुर्थ भाव
पंचम भाव
षष्ठ भाव
सप्तम् भाव
अष्टम् भाव
नवम् भाव
दशम् भाव
एकादश भाव
द्वादश भाव


जातक पारिजात अ. १/८


मेष - शिर:
वृषभ - मुख:
मिथुन - वक्षस्थल:
कर्क - हृदय:
सिंह - उदर:
कन्या - कटि:
तुला - बस्ति:
वृश्चिक - रहस्य देश:
धन - उरु
मकर - जानु
कुंभ - पादपिंड
मीन - चरण:

जातक पारिजात अ- १।८

श्वेतवर्णः दीर्घः, चतुष्पाद, रात्रिबली, दक्षिण दिग्वासी, ग्राम्यः,
वैश्यवर्णः, भूमितत्वः रजोगुणी, पृष्ठोदयः, स्त्रीसंज्ञकश्च कथितः । अस्य
स्वामी च शुक्रो ज्ञेयः ।

मिथुन : काल पुरुषस्य बाहुरूपः द्विस्वभावः विषमः क्रूरः, पुरुष संज्ञकः, त्रिधातु प्रकृतिकः, वात-पित्तकफात्मकः शीर्षोदयः वीणा गदायुत स्त्री पुरुष संज्ञकः युग्म रूपः पश्चिम दिग्वासी बृहज्जातके आचार्यं वराहमिहिरेण अस्मिन् विषये विस्तृतेण चर्चा कृता वर्तते । एते द्वादश नाम भावाः कालपुरुषस्य विविध अंग रूपाः[3] ।

सूर्यशुक्रयोर्मध्ये पितृकारकः बलवान् भवति, चन्द्रमंगल योर्मध्ये मातृ कारकः बलवान भवति । 'पित्रो प्राक्काले, शर्मैव माता पितरौ जनमतः'[4] मात्रा सह पुत्रमेके समामनन्ति ।[5]

जाति भेदे सर्वेषु ग्रहेषु - ब्राह्मणः रविः, कुजः क्षत्र क्षात्रः, शनिः शूद्रश्च, दू दूरजातिश्च राहुः, केतुः चाण्डालः ।

शनि राहु केतु जेषु वैपरीत्यम् ।[6]

सप्तमे राहु युते चोदर व्यथा, केतु योगे चाधिक्यम् । जातकः असन्तुष्टो दुःखी खिन्नात्मा च भवति । लग्नाद्रूढात चन्द्रः सूर्यश्च अष्टमे द्वादशे वा स्यात्, जातको संतुष्टः प्रसन्नात्मा च भवति । वायु तत्वः, द्विपदः रात्रि बली, ग्राम्यः, समगात्रः, हरिद्वर्णश्च निगदितः । बुधश्चास्याधिपतिर्ज्ञेयः ।

कर्कः कालपुरुषस्य हृदयं चरः सौम्यः समः कफ प्रकृतिकः स्त्री संज्ञकः पृष्ठोदयः

पाटल वर्णः, वनेचरः, शीर्षोदयः, बृहद्गात्रः, पाण्डुवर्णः, पूर्वदिग्वासी, दिनबली, सूर्यश्चास्याधिपतिः कथितः ।

सिंह- कालपुरुषस्योदरं, स्थिरः, विषयः, क्रूरः, पुरुष, पित्त प्रकृतिकः सत्वगुणी, चतुष्पदः, क्षत्रियः, वै वनेचरः, शीर्षोदयः, बृहद्गात्रः, पाण्डुवर्णः, पूर्व दिग्वासी, दिग्बली सूर्यस्यचास्याधिपतिः कथितः ।

कन्या- काल पुरुषस्य कटिः द्विस्वभावा, समा, सौम्या, स्त्री संज्ञका पर्वतचरा दिन बलान्विता, शीर्षोदया, मध्यमदेहा, द्विपदा, दक्षिण दिग्वासिनी, सस्याग्नियुता, वैश्यवर्णा चित्रा वायुतत्वा, कुमारी, तमो गुणान्विता, स्वामी, चास्या बुधः प्रोक्तः ।

तुला- कालपुरुषस्य वस्तिः चरः क्रूरः विषमः, पुरुषः, त्रिधातुप्रकृतिकः, शीर्षोदयः, दिनबली, कृष्णावर्णः, रजोगुणी, पश्चिम दिग्वासी, भूमिचरः, हिंसकः, शूद्रजातिकः, मध्यतनुद्विपदः, स्वामी चास्य शुक्रो ज्ञेयः ।

वृश्चिक- कालपुरुषस्य लिंग, स्थिरः, सौम्यः, स्त्रीसंज्ञकः, कफ प्रकृतिकः, बहुपदः, ब्राह्मणः, बिलवासी, उत्तर दिग्वासी, दिनबली, पिशंगवर्णः, जलतत्वः, भूचरः, रोमयुतः, अति तीक्ष्णाग्रः, स्वामी चास्य भौमः कथितः ।

धनुः- काल पुरुषस्योरुयुगलं द्विस्वभावः, क्रूरः, विषमः, पुल्लिंगः, पित्तप्रकृतिकः, पृष्ठोदयः, सत्वगुणी, पिंगलवर्णः, रात्रिबली, अग्नितत्वः, क्षत्रियः, समगात्रः,

घनुर्धर:, पूर्वदिग्वासी, भूचर:, तेजस्वी, स्वामीचास्यवृहास्पतिर्ज्ञेय: ।

मकर- कालपुरुषस्य जानु युग्मं, चर:, सौम्य:, स्त्रीसंज्ञक:, वातप्रकृतिक:, तमोगुणी, भूमितत्व:, दक्षिण दिग्वासी, रात्रिबली, पृष्ठोदय:, दीर्घ तनु:, चित्रवर्ण:, वन भूचर:, पूर्वार्द्ध चतुष्पदश्चोत्तरार्द्ध पदहीनो जल चरश्च । स्वामी चास्य शनि प्रोक्त: ।

कुम्भ - काल पुरुषस्य जंघा युग्मं, स्थिर:, क्रूर:, विषम:, पुरुष: त्रिधातु प्रकृतिक:, कुम्भयुत:, बभ्रुवर्ण:, मध्य तनु:, द्विपद:, दिनबली, जलचर:, वायुतत्व:, शीर्षोदय:, तमोगुणी, शूद्र:, पश्चिम दिग्वासी स्वामी चास्यापिशनि: प्रोक्त: ।

मीन:- काल पुरुषस्य चरण युग्मं द्विस्वभाव: सौम्य:, स्त्री संज्ञक:, सम:, कफ प्रकृतिक:, मीनयुग्म,पुच्छयुत:, दिवा बली, जलतत्व:, सत्वगुणी, स्वस्थ:, जलचर:, ब्राह्मण:, पदरहित:, मध्यदेह:, उत्तर दिग्वासी, उभयोदय:, स्वामी-चास्य वृहस्पति: कथित: ।

जैमिनि दृष्ट्या लग्नमेव देह: 'देहमधिकृत्यात्रैव सर्वं विचार्यम् । पुनश्च लग्नस्य लग्नेशष्य वा बलाबलत्वेन शेषभावानामन्य वस्तुनांच [illegible] पु बलाबलास्याधारत्वम् । इदमपि दृश्यते यदि लग्नंच किंचिद्बलयुतं परंच लग्नेशच्च पूर्णबल युतस्तदा शरीरं दुर्बलं भवति परं लग्नेश बलवशादन्ये राजयोगा परिदृश्यन्ते । [illegible] अर्थाद्धन वाहन सन्तति स्त्री गृहादिकानां सुखं भवति । परंच शरीरे दौर्बल्यमस्वास्थ्यं वा दृश्यते । उभयोर्बलवतो: सतो: सर्वं सौख्य प्राप्तिरिति भाव: । इत्थमपि विलोक्यते यत् लग्नंच पूर्ण बलवत् लग्नेशश्च बलहीनस्तदा शरीरं सबलं भवति ।

परंचान्य राजयोगादीनाममभावात् क्व स्त्री पुत्रादिक सुखस्याप्यभावो दृश्यते अत्र च सूक्ष्मेण सर्वेषां भावानां भावेशानांच विचार: आवश्यक: । यस्य भावस्य स्वामी स्वोच्चस्थो मूलत्रिकोणस्थो मित्रस्थो वा ( अत्र ग्रह: शुभो शुभो वा स्यात् ) तस्य भावस्यापि वृद्धि: । यस्य भावस्य स्वामी नीचस्थो स्तं गत: शत्रुराशिस्थो त्रिकस्थो वा स्यात्तस्य भावस्य हानि: । अयं भावो लग्नेशो यदि पापाक्रान्तो थवा त्रिकस्थश्चेत्तदा शरीरे कष्टम् । एवमेव लग्ने थवा चन्द्राश्रित राशावपि पापक्रान्ते पाप दृष्टे शुभ ग्रह दृष्टि शून्ये च शरीर सुखा भाव: । अन्यथा लग्ने लग्नेशे वा शुभ ग्रह युते दृष्टे वा सति शरीर सौख्यम् । लग्नेशे बुध गुरु शुक्रान्यतमे च केन्द्र त्रिकोणस्थे दीर्घायु योग: । लग्नेश चर राशिस्थे शुभ ग्रह दृष्टे सति कीर्तिमान् महाभोगी देह पुष्टि युतो जातको भवति ।

लग्ने राहुयुते चन्द्रदृष्टे लग्ननवांशे च शनिसूर्यौ चेत्तदा यमलो-पतिर्भवति ।

यदि रवि चन्द्रौ चैकभावस्थावेक नवांशकौ चेत्तदा जातको मासत्रयेन मासत्र्यान्तं दुग्धेन पोषित: सन् पश्चात् पित्रा भ्रात्रा च पालितो भवति ।

यदि द्वितीय भावाधिप शुक्र युतो थ वा शुक्रादिग्रहत्रयस्य सम्बन्ध युतस्तदा नेत्र सुखमन्यथा नास्तीति भाव: । द्वितीय भावे सूर्य चन्द्रौ स्थितौ सन्तौ । निशान्धत्वं प्रयच्छत: लग्नेश धनेश सूर्या एते त्रय एव यदि द्वितीयभावस्तदा जात्यन्धतां प्रयच्छति । ~~एवम~~ एवमेव यदि चतुर्थेश दशमेशौ वागीश द्वितीयेश युतौ त्रिकस्थौ चेत्तदा मूकत्व प्रदौ ज्ञेयौ इति । विद्याधीशौ गुरु बुधौ केन्द्र त्रिकोणस्थ ग्रहोच्चस्थौ विद्यां प्रयच्छ: त्रिकस्थौ च विद्याभावं कुर्वत: । द्वितीयेशे

एकादशेशे वा षष्ठस्थे द्वितीय एकादशौ भावावपि पापयुतौ दृष्टौ वा तदा निर्धन योगः । द्वितीयैकादशेशौ पापा क्रान्तौ त्रिकस्थौ तथा भिक्षाटन योगः । द्वितीयस्थे राहौ चैकादशस्थे भौमे द्वितीयैकादशेशौ च त्रिकस्थौ राज दण्डाद्धनहानिः प्रोक्ता ।

तृतीयस्थाने स्त्रीगृह युते थ वा तृतीयेशे स्त्रीग्रहे सति भगिनि योगः । वैपरीत्ये पुङ्ग्रहे सति भ्रातृयोगः मिश्रे मिश्रं फलमिति । भौमे तृतीयेशे चाष्टमस्थानस्थे सति भ्रातृनाश योगः । तृतीयस्थे बुधे चन्द्रेण च युते तृतीयेशे भ्रातृकारके ग्रहे च शनिनाक्रान्ते सति जातकात्पूर्वं भगिनीमरणान्तथा पश्चात् भ्रातृमरणमिति ज्ञेयम् । भ्रातृ कारके राहुणा युते तृतीयेशे च नीचस्थे नुज नाशो ज्येष्ठ भ्रातृ त्रय योगश्च । तृतीयेशे केन्द्रगे भ्रातृ कारके च त्रिकोणस्थे परमोच्चस्थ गुरुणा युते सति द्वादश भ्रातृ योगः । तेषु ज्येष्ठद्वयं तृतीय-सप्तम-नवम- द्वादशश्चाल्पा युषः शेषः षट् दीर्घायुष इति । द्वादशेशेन गुरुणा वा युते भौमे तृतीयस्थे च चन्द्रे तथैतेषां शुक्रदृष्टेषु सप्त संख्याक भ्रातृणां योगः ।

लग्नेश चतुर्थेशयोः केन्द्र त्रिकोणगतोः शुभ ग्रहयुतयोः सतोः सुन्दर गेहाप्तियोगो ज्ञेयः । चतुर्थेशे स्वोच्चस्थे स्वांशे च पंचमेशे सति सुख वाहन-समृद्धिः विचित्र सौध प्राकार गृह प्राप्तिः । पूर्वोक्त योगे चतुर्थे शुभ ग्रह युते सति मातृ कारके च बलवति मातुर्दीर्घायुर्योगः चतुर्थेशे शुक्रे च केन्द्रगे सति बुधे च स्वोच्च-राशिस्थे जातको विद्वान पंडितो भवति । चतुर्थस्थे ~~जातको-चिद~~ शनौ रविणा युते भाग्यस्थे च चन्द्रे भौमे चैकादशस्थे गोमहिष्यादिलाभः ।

चतुर्थौ चतुर्थेशे वा चरग्रह युते भौमे षष्ठे ष्टमे द्वादशे वा सति जातको मूकत्वं प्राप्नोति । लग्नेशे शुभे चतुर्थेशे च नीचराशिगे चतुर्थभाव कारके च द्वादशस्थे चतुर्थेशे चैकादशस्थे सति द्वादशे वर्षे नर वाहन प्राप्ति: । चतुर्थे रविणा स्वोच्चस्थेन चतुर्थेशेन शुक्रेण च युते सति द्वात्रिंशे वर्षे वाहन ? प्राप्ति: ।

पंचमेशे केन्द्र त्रिकोणस्थे पुत्रलाभो अन्यथा त्रिकस्थे पुत्राभाव: पंचमेशे गुरौ सति सूर्ये च शुभ भावस्थे केन्द्र कोणगेषु च शुभ ग्रहेषु एक एव स्थिर: पुत्र: । पंचमेशे स्ते गते पापाक्रान्ते दुर्बले षष्ठस्थे नीचस्थे वा काकवन्ध्या योग: । पंचमेशे षष्ठस्थे लग्नेशे भौम राशिस्थे (मेष वृश्चिकयोरिति) च प्रथम सन्तति मरणं काक वन्ध्यात्वं वा भवति । पंचमस्थे केतौ बुधे च नीचस्थश्च पंचमेशस्य स्वस्थाने दृष्ट्याभावे शनि बुधाभ्यां युते सति काक वन्ध्या योग: । नवमेशे लग्नस्थे पंचमेशे च नीचगे केतु बुधाभ्यांच युते पंचमे भावे कष्टात्पुत्र लाभ: । पंचमेशे त्रिकस्थे नीचस्थे शत्रुस्थे वा सति पापाक्रान्ते च पंचमे भावे कष्टात् पुत्रलाभ: ।

पंचमे बुध राशौ (मिथुन कन्ययो: शनि राशौ मकर कुम्भयो: वा शनि गुलिक युते दृष्टे वा सति दत्तकादि पुत्र योग: । बलवति पंचमे शुक्र गुरु बुध युते दृष्टे वा पंचमेशे चापि बलान्विते बहुपुत्र योग: ।

पंचमेशे चन्द्रयुते त्रिराश्यंशगते पि च कन्या योग: । पंचमेशे राहु युते पंचमस्थे चन्द्र गुरु दृष्टि शून्ये च सति जारज योग: । द्वादशस्थे चन्द्रे ष्टमस्थे गुरौ पापाक्रान्ते दृष्टे वा सति जारज योग: । पंचमस्थे राहौ पंचमेशे च पापयुते गुरौ च नीचराशिस्थे सति द्वात्रिंशद् वर्षे पुत्र योग: ।

पापे षष्ठेशे षष्ठस्थे लग्नस्थे ष्टमस्थेवा तदा शरीरे व्रणं वाच्यम् । षष्ठेशे सूर्ये सति शिरो व्रणम् ।

चन्द्रे मुखे व्रणम्, भौमेकण्ठे व्रणं, बुधे नाभ्यां, गुरोनासिकायां, शुक्रे नयने शनौ पादे, राहौ केतौ च कुक्षौ, व्रणमिति भाव: । बुधे भौमे वालग्नेशे सति चन्द्रेण राहुणा शनिना वाक्रान्ते कुष्ठयोग: ।

लग्नेशं विना चन्द्रेलग्नस्थे, राहुणा युते श्वेतकुष्ठस्य,शनिनायुते कु कृष्ण कुष्ठस्य भौमेन युते सति रक्तकुष्ठस्य योगेति ।

षष्ठेशाष्ठमेशौ लग्नस्थौ रविणा युतौ चेत्तदा ज्वरगण्डस्य, भौमेन युते ग्रन्थिन: शास्त्रघातस्य वा, बुधेन युते पित्तस्य, गुरुणा युते रोगनाशस्य शुक्रेण युते स्त्रीकृत रोगस्य शनिना युते सति वातरोगस्य, राहुणा युते सति नाभौ, चाण्डाल कृत गण्डरोगस्य केतुना युते भयस्य, चन्द्रेण युते कफ-श्लेष्मादि रोगस्य जलगण्डस्य वा योग: ।

षष्ठ भावे षष्ठेशे पि पापेन संयुक्ते शनिराहु संयोगे च जातक: सदा रोगी भवति । षष्ठस्थे भौमे षष्ठेशे चाष्टमस्थे षड्वर्षे द्वादश वर्षे वा ज्वर योग: ।

पंचमेशे षष्ठस्थे षष्ठेशे गुरुणा युते द्वादशेशे लग्नस्थे जातकस्य पुत्र एव जातकस्य शत्रुर्भवति । सप्तमेशे षष्ठे ष्टमे द्वादशे वा गते सति रुग्णस्त्री योग: । यदि सप्तमेश: स्वोच्च मित्रस्थस्तदा पूर्वोक्त योगाभाव: ।

यदि शुक्रः सप्तमस्थः स्यात्तदा अतीव कामी भवति । अन्य भावेषु पापाक्रान्तः सर्वस्थितौ भवेत्तदा स्त्रीमरण योगः । सप्तमेशः शुभ ग्रह युतो दृष्टो वा पूर्णबली भवेत्तदा जातको धनी मानी सर्व सुख सौभाग्य युतो भवति ।

यदि सप्तमेशो नीचस्थः शत्रुस्थो निर्बलो वा स्यात्तदा बहुभार्यायोगो भवति ।

सप्तमे शनि भौम युते सप्तमेशे च शनौ भौमे वा सति वेश्या जारिणी वा पत्नी जातकस्य भवति । सप्तमे सप्तमेशे च नीचायौ शत्रुस्थे पापाक्रान्ते दृष्टे वा कलत्र हानि योगः । सप्तमेशे ष्टमस्थे द्वादशेशे च सप्तमस्थे चैकोनविंशे वर्षे भार्यामरण योगः । लग्नेशे स्वोच्च राशिस्थे चन्द्रे चैकादशस्थे गुरौ चाष्टमस्थे दीर्घायुर्योगः ।

नवमेशः शुक्रश्च द्वावेव भाग्य प्रदौ केन्द्रत्रिकोणगौ चेदति भाग्य प्रदौ चतुर्थेश शुक्र गुरुयुते शुभराशिगते च नवम भावे नवमेशे च केन्द्रस्थे बहु देश पर्यटनम् । नवमस्थे गुरौ नवमेशे च केन्द्रगे लग्नेशे च बलवति बहुभाग्य योगः । नवमेशे बलान्विते शुक्रे नवमस्थे बलवद् गुरौ च केन्द्रस्थे पितृ भाग्यान्वित योगः । नवम स्थानात् द्वितीये चतुर्थे वा भौमे नवमेशे च नीचस्थे जातकस्य पिता निर्धनो भवति । गुरु दृष्टे नवमेशे केन्द्रगे सति जातकस्य पिता वाहन युतो राजा वा राज तुल्यो भवति । नवमेशे च दशमस्थे दशमेशे च नवमस्थे जातकस्य पिता कीर्तिमान् धनाढ्यश्च भवति । सूर्ये परमोच्चस्थे नवमे चैकादशस्थे जातको धर्मात्मा राजप्रियः पितृ भक्तश्च भवति । षष्ठे ष्टमे द्वादशे वा सूर्ये ष्टमेशे नवमस्थे द्वादशेशे च लग्नस्थे षष्ठेशे च पंचमस्थे

जातकस्य जन्मन: पूर्वमेव पितुर्मरण योग: । अष्टमस्थे सूर्ये ष्टमेशे च नवमस्थे जातकस्य प्रथम वर्षे एव पितृ मरण योग: । नवमेश युते परमोच्यस्थे शुक्रे तृतीयस्थे च शनौ बहुभाग्य योग: । नवमस्थे गुरौ नवमेशे च केन्द्रस्थे विंशद् वर्षात्परं बहु भाग्य योग: ।

यदि सूर्य: स्वोच्चस्थो मित्रस्थ उच्चवर्गादिस्थो वा स्यात्तदेभिर्वस्तु व्यापारैर्द्रव्यलाभादिकं ज्ञेयम् । चामरादि राजचिन्ह वस्तुविक्रय- कृषि कर्म सेवा, पैशुन्यम्, लिपिकर्म, धनार्जनम्, व्यय:, रोगनाश कर्म गमनागमन विक्रय:, विवाद:, प्रेतकार्य भ्रातृणां कलह:, विवाह:, पुत्रादिकमित्यादिभिरिति भाव: ।

यदि चन्द्र: स्वोच्चादिकस्थस्तदा शंखादि विक्रय:, मैथुन कर्म, स्त्रीषु राजपुरुषेषु च मित्रता, कृषि कर्म, वस्त्रादि व्यापार:, ब्राह्मण विरोध: स्वोत्कर्ष हानि:, स्वदेश द्रव्य बलादि हानिश्चे त्यादिकं फलं वाच्यम् । दशमे बलहीने जातक: कर्महीनो भवति । एकादशे दशमे च पापाक्रान्ते जातको नीच कर्म कृत्स्वजनद्वेषी च जायते । दशमेशोऽष्ट मस्थे राहुणा युते सति जातको जनद्वेषी महामूर्ख: दुष्कर्म कृच्च भवति ।

दशमेशे नवमस्थे लग्नेशे दशमस्थे पंचमस्थे च चन्द्रे ख्यातिकीर्ति प्राप्ति योग: ।

एकादशेशे च केन्द्र त्रिकोणस्थे बहुलाभ योग: । एकादशादेक दशस्थे चन्द्रेण युते गुरौ धन धान्य युतो श्रीमान् रत्नाद्या भूषण युतो जातको भवति ।

द्वादशे द्वादशेशे च पापाक्रान्ते दृष्टे वा देश-देशान्तर भ्रमण योग: । द्वादशे द्वादशेशेच शुभ युते दृष्टे वा स्वदेश भ्रमण योग: ।

मारक विचार:

आदौ जैमिनिना अस्य ग्रन्थस्य द्वितीय अध्यायस्य द्वितीय पादे मारक विषये चर्चा कृता दृष्यते । तेन चतुर्थे अध्याये द्वितीयपाद पि मारक विषये किंचिदुदुल्लेख: कृत: - 'बल पदयो: प्राणी मारक:'[७] तत्र जन्म कुण्डल्यां तृतीयाष्टमौ भावौ मनुष्यस्यायुर्घातकौ । तयोर्व्यय भावौ द्वितीय सप्तमौ भावौ मारक भावा वित्यर्थ: । तत्रापि सप्तमाद् द्वितीय भावस्य मारकत्वं बलवत्तरम् । इति सामान्य विचार: । आत्माकारकांशलग्नात्तथा जन्मलग्नाच्च ये तृतीय षष्ठाष्टम द्वादश द्वितीय सप्तम् स्थानाधिपास्ते सर्वे मारका उच्यन्ते । तेषु बलवत्तरो मुख्य मारकेति । सर्वेष्वेव समान बलवत्सु षष्ठेश एव मुख्य मारक इति भाव: । मारक ग्रहाश्रित राशिदशाया मथ च मारक ग्रह राशिदशायाम् पापग्रह योगे निश्चितो मृत्युरिति । दीर्घायुर्मध्यमायुयोगत्वेन मारकत्वं दर्शयति । मध्यमायुर्योगे षष्ठात्षष्ठेतराशापि त्रिकोणगो ग्रहो मारक: । षष्ठेशाश्रित राशीदशायामपि मृत्यु योग: । दीर्घायुर्योगे तु षष्ठराशेस्तदीशस्य वा त्रिकोणस्थो यो ग्रहस्तस्य तदाश्रितस्य राशीशस्य वा दशायां मृत्युयोग: ।

रूद्राश्रये ऽपि-[८]

ग्रहाणां शूल रूद्र मह्रे महेस्वर बशेति चतुष्टयं भेदमधिकृत्य आयुर्दाये मृत्यु विचार: । लग्न सप्तमयोर्मध्ये योग्रहो बली स शूलग्रह इत्युच्यते । अत्र भेदद्वयम् एतयोर्मध्ये पि य: शुभ दृष्ट: स बलवान् रूद्रेति । जैमिनीय सूत्रस्य द्वितीये ध्याये एतत् सम्यक् निरूपितं वर्तते ।[९]

`रवि त्रिकोणे`[१०]

स्वोच्चस्थ: परमोच्च: स्वस्थ: केन्द्रात्रिकोणैकादशाभावगो मूल [illegible] त्रिकोणस्थो नवमेशेन दशमेशेन वा युत: षड्बल युत: स्ववर्गादिस्थिति: सूर्यश्चेत्तदा महासौख्य धनलाभ राज सन्मानाश्वान्दोल्यादिक प्राप्तिर्भवति । पंचमेशेन युते सति पुत्र लाभो द्वितीयेशेन गजान्तैश्वर्य लाभश्चतुर्थेन युते तु वाहन त्रय प्राप्तिर्नृप कृपया सैनापतिश्च भवति । सुख धन वस्त्र वाहनादिक लाभश्च प्रोक्त: ।

नीच: षष्ठाष्टम द्वादश भावगो निर्बल: पाप युतेक्षितो षष्टाष्टमद्वादश भाव पति युतोराहु केतु युतो वा स्यात्तदा सूर्यस्य दशायां धन-धान्य नाश राजदण्ड महापीड़ा ज्वर प्रकोप प्रवासपमृत्यु भय चौर सर्प व्रण भीति यश: क्षयादिकंच प्रोक्तम् ।

पंचमे नवमे वा यदि सूर्यो भवति स्त्री स्वाल्पावस्थायां विधवा भवति । लग्नात् तृतीये चन्द्रे आत्माकारके अल्पावस्थायां स्त्री विधवा भवति । त्रिकोणे चन्द्रे कुरूपि क्रोधी च भवति । बुधे वन्ध्या, त्रिकोणेषु चा गुरौ पति भक्ति परायणा, गुरु त्रिकोणेष्वपि पति भक्ति परायणा आज्ञाकारिणी भवति शुक्रे सौभाग्यकारिणी, त्रिकोण युते भाग्यशालिनी शनौ स्त्री पुरुष वत् कठोराचरणं करोति राहु गृह कार्ये निमग्नो भवति । केतौ चाण्डाला बहुभुक् क्रूरा च भवति ।

`पितृ लाभ धन प्राणयोश्च`[११] यदि लग्नेश: पंचमस्थाने पंचमेशश्च लग्ने स्यातामथवात्मकारक पुत्रकारकावुभा वपि लग्ने पंचमे स्वोच्चस्थौ स्वांशस्थौ शुभ ग्रह

दृष्टो भवेवान् तदा जातको अतीव गुणज्ञो धन सम्पन्नो भवति ।

नवमेशात्मकारको लग्ने पंचमे सप्तमे वा शुभ ग्रह दृष्टौ स्थितौ भवेतान्तर्हि जातको राजा भवति । अथवात्मकारकांशाल्लग्ने शाद्वा तृतीये षष्ठमे पापग्रह युते दृष्टे वा पि राजा भवति । पाप शुभ ग्रहमिश्र संयोगे केवलं धनी भवति । नवमेशात्मा कारकश्च द्वावेव लग्ने पंचमे सप्तमे वा शुभ ग्रह युतौ दृष्टौ वा भवेतान्तदापि राजयोग: प्रोक्त: । लग्नेशात्कारकाच्च द्वितीये चतुर्थे पंचमे च शुभ वै ग्रह योगे राजा भवति । एवमेव तृतीये षष्ठे च पापग्रह योगे सत्यापि च राजा भवति । मिश्र वृ ग्रहैस्तु केवलं धनी भवति । कारके तत: पंचमे वा लग्ने लग्न पदे वा गुरु चन्द्र दृष्टे युते वा शुक्रे सति राजवर्गीयो भवति । यद्येकेकस्वग्रहो जन्मलग्नं होरालग्नं घटीलग्नंच पश्यति तदापि राजयोगो भवति ।

'जन्मकाल घटिकास्वेकदृष्टासु राजान:' १२

लग्ने द्वितीये च शुभ ग्रह युते तृतीये च पापान्विते चतुर्थे च शुभग्रहाश्रिते नरो राजा व तत्समोजायते । चन्द्र गुरु शुक्रान्यतम एको पि ग्रह: स्वोच्चस्थो द्वितीय भावगश्च स्यात्तदा राजयोगो वाच्य: । यदि षष्ठेशाष्टमेशौ शुभ ग्रहो यत्रकुत्रस्थौ लग्नं पश्यतस्तदपि राजयोगो ज्ञेय: । गुरु बुध शुक्रान्यतम एकोपि ग्रह: स्वोच्चस्थ: स्यादन्ये शुभ ग्रहा केन्द्रगा स्युस्तदापि राजयोगो निगदित: । केन्द्रेषु शुभग्रहेषु तृतीय षष्ठैकादशेषु च पापेषु हीन वंशजो पि राजा भवति । यदि ग्रहत्रयमुच्चस्थं जन्मकाले स्यादथ वा ग्रहाणां चतुष्टयं पंचकं वा स्वोच्च त्रिकोणगं भवेत्तदापि हीन वंशजो राजा भवति । यदि ग्रहाणां षट्कमुच्चस्थं स्यात्तदाचक्रवर्ती राजा भवति ।

यदि ग्रहाणां षट्कमुच्चस्थं स्यात्तदा चक्रवर्ती राजा भवति । चन्द्र शुक्रौ यत्र कुत्रस्थौ तृतीयैका दशमौ परस्परं दृष्टौ वा भवेतान्तदापि राजयोगो ज्ञेयः । दशमेशे स्वोच्च स्थे लग्नं पश्यति सति शुभग्रहेषु केन्द्रगेषु राजयोगः । यदि चतुर्थं स्थानगः शुभ ग्रहः स्यात्तर्हि राजयोगः । केन्द्र त्रिकोण सम्बन्धे, त्रिकोणात्रयं लक्ष्मीस्थानं केन्द्र चतुष्टयं विष्णु स्थानं प्रोक्तं अनयोः परस्पर सम्बन्धेन विशेषं राजयोगो भवति ।

तत्रापि चतुर्थ पंचमयोर्नवम दशमयोर्योगे विशेष राजयोगो ज्ञेयः । केन्द्र पंचमयो योगे मात्य योगः । नवमेश दशमेश योगे राजवन्दितो भवति । राजा भवति । यदि दशमेशश्च नवमस्थः स्यात्तथा नवमेशश्च दशमस्थो स्यात्तथा राजयोगो भवति । यदि द्वौ पारिजात वर्गगौ भवेतान्तर्हि राजा लोकानु शिक्षको हस्ति घोटक रथादि युतो भवति ।

पंचमे शुक्रे स्वस्थे वृषे तुलायां वा शनौ च चैकादशस्थानाश्रिते वृश्चिके मेषे वा महान् धन योगः ।

आत्माकारके लग्ने च शुभ ग्रह नवांशे धनवान् भवति । शुभांश केन्द्रेषु राजयोगः ।

ooooooooooooooooooooooo

पंचमेषे केन्द्र त्रिकोणस्थे पुत्रलाभो भवति । पंचमेषे चन्द्र युते त्रिराश्यंश

गतेपि च कन्या योग: । चन्द्र बुधाभ्याम् स्त्री योग: ।

तृतीयस्थाने स्त्रीग्रह युतेऽथ वा तृतीयेशे स्त्रीग्रहे सति स्त्री योग: । वैपरीत्ये पुंङ्ग्रहे सति पुरुषयोग: मिश्रे मिश्र फलमिति ।

उपपद लग्ने बुधयुते सर्वदेशाधिप योग: । गुरु युते सर्व योग:, शुक्रयोगे कविर्वक्ता च भवति । स्वांशे केवलं पाप सम्बन्धे पर जात: । यदि लग्ने पापग्रहा मेषराशौ च सूर्यस्तदायं मेष महापाकी नाम योग उच्यते । तदापि पितृमरणं भवितुमर्हति । चन्द्रनवांशेशौ राहु केतु युतश्चे दथ वा समराशिगौ वा भवेतदायं जातकी राज सकर्म कारको बोध्य: । यदि शुभ उच्चस्थौ वा स्याच्चदा सात्विक कर्म कारक: प्रोक्त: । नवांशेशौ नीचस्थ: स्याच्चदा तामस कर्मभि: पूर्व पापादिकं कृतमिति ज्ञेयं । गुरु युतमावतुर्पंचमे स्थाने ज्ञान धर्म पुत्र धनादिकानां ज्ञानं ज्ञेयम् । तत्र शुभ रेखा फलाधिक्ये सन्तति सुखाधिक्यमन्यथा सन्तति सुखा भाव: । शनि नवांशे शनियुते शनि क्षेत्रस्थे नीचांशे पापयुते वा शुक्रे नीच स्त्री संयोगेति । भौमांशे भौम क्षेत्रस्थे भौमेन युते दृष्टे वा शुक्रे परदारतो भवति ।

पापारूढांशगे चन्द्रे सप्तमे द्वादशगे पि वा पापा क्रान्ते च शुक्रे स्त्रीहेतो-र्जातक: शुभमाह्वेत् । अथ च शुक्रनवांश सदृशी सप्तमेशस्य गुणान्विता भार्या भवति ।

सप्तम भावे पापग्रहेणाप्रकाशक ग्रहेण वा युते सति चाशुभं भवति । च तच्च क्रमेणैवं बोध्यम् । सप्तम भावे सूर्ये सति वन्ध्या, क्षीणे चन्द्रे सति व्यभिचारिणी, भौमे सति स्त्रीनाश: , शनौ सति दुर्भगा राहौ सति पररता, स्त्री भवतीति पापग्रहाणां फलं ज्ञेयम् ।

सप्तमे भावे धूमे कार्मुके वा सति विवाहाभावः, परिवेषेसति दुःशीला केतौ सति वन्ध्या सती च। पापे सति गर्भस्राव युतानारी अवधि अवव भवतिचा-प्रकाशक ग्रहाणां फलमिति। सप्तमे पूर्ण चन्द्रेसति सुशीला स्त्री प्रसुता च ज्ञेया। बुध चा पुत्रा, गुरौ सुपुत्रिणी शुक्रे सौभाग्यशालिनी श्रीमती पुत्रिणी भार्या भवतीति शुभ ग्रहाणां फलम्।

---

## सन्दर्भ-सूत्री (४)


१- जैमिनीय सूत्राणि-श्री सुशीलकुमार कार, ४।१।१ पृ०सं० ११६
२- जैमिनीय सूत्राणि- गंगाविष्णु-श्रीकृष्णादास-मुंबई २।१।१-४
३- बृहज्जातक अ-५।२३-२६
४- जैमिनीय सूत्राणि ४।१।२१-२२, बैंगलोर ।
५- जैमिनीय सूत्राणि १।१।१६
६- -तत्रैव- ४।१।३६
७- -तत्रैव- ४।२।१
८- -तत्रैव- ४।२।२
९- -तत्रैव- २।१।३२
१०- -तत्रैव- ४।३।७५


---

**APPENDIX:**

## LIST OF BOOKS


1. A manual of Hindu Astrology-by Dr.B.V.Raman-1976
2. Ashtaka Varga, by Dr.B.V.Raman-1978
3. Astronomy by Prof.F.L.Vipal- 1959
4. Astrology and Modern Thoughts- Dr. B.V.Raman-1965
5. Astrology for all- By Alan Leo 1968
6. Bhrugu Sutram-By-Dr.Gaurishankar Kapoor 1981
7. Bhavarsha Ratnakar,By-Dr.B.V.Raman-1978
8. Dictionary of Astrology, By-Alan Leo,1973.
9. Everday Astrology, by-V.A.K.Ayar
10. Esoteric Astrology, by-Bipin Bihari Madhuri,1975.
11. Krishna Murti Padhdhati, Vol.I & II by-K.S.Krishna Murti-1966.
12. Notable Horoscopes,by-Dr.B.V.Raman 1963.
13. The Complete Astrologer, by-Derek and Julia Parker-London.
14. And other books etc.


***